मुद्गलउवाच।
श्रीगणपतिर्जयति।ॐमत्सरंशंतिमापभेदृष्ट्वादेवर्षयस्तदा।।प्रहृष्टमनसोजातास्तुष्टु
वुस्तंगजाननं।।१।।देवर्षयऊचुः।।सदात्मभूतंविकारादिहीनंविकारादिभूतंमहेशादि
वंद्यं।।अपारस्वरूपंस्वसंवेद्यमेकंनमामःसदावक्रतुंडंभजामः।।२।।अजंनिर्विकल्पं
कलाकालहीनंहृदिस्थंसदासाक्षिरूपंपरेशं।।जनज्ञानकारंप्रकाशैर्विहीनंनमामः
सदावक्रतुंडंभजामः।।३।।अनंदस्वरूपंसदानंदकंदंप्रकाशस्वरूपंसदासर्वगतं।
अनादिंगुणादिंगुणाधारभूतंनमामःसदावक्रतुंडंभजामः।।४।।धरावायुतेजो
मयंतोयभावंसदाकाशरूपंमहाभूतसंस्थं।।अहंकारधारंतमोमात्रसंस्थं
मामःसदावक्रतुंडंभजामः।।५।।रवीवायुविष्णुजलाधीशमृत्युविधात्रग्निवेद्या
नरेंद्रप्रकाशं।।दिशाबोधकंसर्वदेवाधिरूपंनमामःसदावक्रतुंडंभजामः।।६।।
उपस्थत्वचावाणिनेत्रप्रकाशंकरांघ्रिस्वरूपंसदाघ्राणजिह्वं।।गुदस्थंऋति

स्थंमहास्वप्रकाशंनमामःसदावक्रतुंडंभजामः॥७॥रजोरूपसृष्टिप्रकाशेविधिंतं
सदापालकेकेशवंसत्वसंस्थं॥तमोरूपधारंहरंसंहरेचनमामःसदावक्रतुंड १
जामः॥८॥दिशाधीशरूपंसदाशाश्चरूपंमहादिप्रकाशंध्रुवादिखगस्थं
अनंताहिरूपंतदाकारहीनंनमामःसदावक्रतुंडंभजामः॥९॥महत्तत्वरूपं
प्रधानस्वरूपंत्वहंकारधारंत्रयीबोधकारं॥अनाद्यंतमायातदाधारपुस्थं
नमामःसदावक्रतुंडंभजामः॥१०॥सदाकर्मधारंफलैःस्वर्गदंतंत्यकर्मप्र
काशेनमुक्तिप्रदंतं॥विकर्मादिनाशातनाधाररूपंनमामःसदावक्रतुंडंभ
जामः॥११॥अलोभस्वरूपंसदालोभधारंजनानंदकारंजनाधीशपालं॥रणा
सिद्धिदंमानवंमानवस्तंनमामःसदावक्रतुंडंभजामः॥१२॥लतारूपरूपंसदा
पक्षिरूपंधनादीविकारंसदाधान्यरूपं॥पितापुत्रपौत्रादिनास्वरूपंनमामः १

सदावक्रतुंडंभजामः॥१३॥खगेशस्वरूपंश्वपादीपशुस्थंमृगेंद्रादिबोधंमृगेंद्रस्व
रूपं॥धराधीरहेमाद्रिमेरुस्वरूपंनमामःसदावक्रतुंडंभजामः॥१४॥सुवर्णा
दिधातुमयंरंगसंस्थंसमुद्रादिमेघस्वरूपंजलस्थं॥जलेमत्स्यभेदादिनाना
विभांतंनमामःसदावक्रतुंडंभजामः॥१५॥सदाशेषनागादिनागस्वरूपं
सदानागभूषंचलीलाकरंतैः॥सुरारिस्वरूपंचदैत्यादिभूतंनमामःसदा
वक्रतुंडंभजामः॥१६॥वरंपाशधारंसदाभक्तपोषंमहापौरुषंमायिनंसिं
हसंस्थं॥चतुर्बाहुधारंसदाविघ्ननाशंनमामःसदावक्रतुंडंभजामः॥१७॥
गणेशंगणेशादिवंद्यंपरेशंपरंसर्वपूज्यंसुबोधादिगम्यं॥महावाक्यवेदांत
वेद्यंपरेशंनमामःसदावक्रतुंडंभजामः॥१८॥नविंदंतियंवेदवेदांतरूपान

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

विंदंतियंशास्त्रशास्त्रज्ञभूपाः॥नविंदंतियंयोगयोगीश्वराद्यानमामः सदावक्रतुंडंभजामः॥१९॥अनंतावतारैः सदापालकंतंस्वधर्मादिसंस्थंजनंकारयंतं॥सुरैर्दैत्यपैर्वंद्यमेकंसमस्थंनमामः सदावक्रतुंडंभजामः॥२०॥त्वयानाशितोयंमहादैत्यभूपः सुशांताधरेयंकृतंयेनविश्वं॥अखंडप्रहर्षेणयुक्तंचतंवैनमामः सदावक्रतुंडंभजामः॥२१॥नवेदाविदुर्यंचदेवेंद्रमुख्यानयोगेर्मुनींद्रावयंकिंस्तवामः॥तथापिस्वबुध्यास्तुतंवक्रतुंडंनमामः सदावक्रतुंडंभजामः॥२२॥मुद्गलउवाच॥एवंस्तुत्वावक्रतुंडंस्थितादेवर्षयः प्रभुं॥बद्धांजलिपुटाः सर्वेतूष्णींभावेनमानद॥२३॥देवानांचमुनीनांचस्तुतिंश्रुत्वागजाननः॥उवाचतान्प्रसन्नात्माहर्षयन्वचनंमहत्॥२४॥वक्रतुंडउवाच॥

शृणुध्वंमुनयः सर्वेदेवामेवचनंमहत्॥मत्कृतमिदंस्तोत्रंमत्प्रीतिवर्धनंभवेत्॥२५॥अनेनस्तोतियोनित्यंमांतस्यपूरयाम्यहं॥भोगान्नानाविधांश्चैवपुत्रपौत्रादिसंपदः॥२६॥यंयमिच्छतिनंतंचदास्यामिनात्रसंशयः॥मुक्तिमुक्तिप्रदंचैवब्रह्मभूतकरंभवेत्॥२७॥नानासिद्धिप्रदंचैवबुद्धिप्रकाशकं॥सुरैर्दैर्वंद्यतोयानियः स्तौतिमामनेनच॥२८॥सहस्रावर्तनान्मर्त्यः कारागृहगतंनरं॥मुंचंतिनात्रसंदेहोमत्प्रियः सर्वदातुसः॥२९॥अपराधानत्ययुक्तोयदिभवतिमानवः॥तस्यापराधसहनंकरोमिस्तोत्रपाठतः॥३०॥एकविंशतिवारंचएकविंशद्दिनानिवै॥यःपठिष्यतिनस्यांहंचिंतितंप्रदद्मिच॥३१॥एकविंशतिश्लोकाश्चभवद्भिर्मत्प्रियात्मकाः॥कृतास्तेमोदसदादेवाः

स्कृतध्वंमुनयोखिलाः॥३२॥तेनविघ्नविहीनाश्चस्वधर्मरुचयस्तथा॥भविष्यथम
हाभागाभुक्तिंमुक्तिंचविंदथ॥३३॥वरंब्रूतमहाभागायेषांयन्मनसिस्थितं॥
तद्दास्यामिनसंदेहःस्तोत्रेणतोषितोत्यहं॥३४॥सूतऊवाच॥एवमुक्तास्त
राःसर्वेमुनयस्तंप्रणम्यच॥ऊचुःप्रहृष्टमनसोवक्रतुंडंमहाबलं॥३५॥
देवर्षयऊचुः॥यदिप्रसन्नतांयातोवक्रतुंडददासिचेत्॥त्वदीयाभक्ति
मचलांदेहिनाथदयानिधे॥३६॥यदिन्यासात्वदीयावैभक्तिर्जन्मेत्वसौ
प्रभो॥किंदुर्लभंचतेषांवैहस्तगाःसर्वसिद्धयः॥३७॥अतोभक्तिंम
हाभागदेहिनोविघ्ननायक॥त्वयात्सावयंसर्वेत्वत्पराःखलु॥३८॥

तेषांवचनमाकर्ण्यदेवदेवोगजाननः॥जगादभावगंभीरं ज्ञाताखिलजनप्रियः॥३९॥
वक्रतुंडउवाच॥मदीयाभक्तिरचलाभविष्यतिनसंशयः॥भवंतोभावयुक्ताश्चेत्तदा
देवर्षयःखलु॥४०॥एवमुक्तंतदर्थेसोवक्रतुंडोगणेश्वरः॥पश्यतांमुनिदेवानांसानंद
रुरोबभूवह॥४१॥ततोदेवगणाः सर्वेखिन्नाःस्वंस्वंपदंययुः॥तमेवध्यायमानास्ते
वक्रतुंडंसुसिद्धिदं॥४२॥मत्सरोपिततः सर्वैर्दैत्यैःपरिवृतोययौ॥स्वपदंप्राप्य
मानश्चसुशांतोभूद्भवनदा॥४३॥तेसत्कादैत्यसंघास्तेययुःस्वंस्वंगृहंमुने॥एवं
मत्सरमाहात्म्यंवक्रतुंडेनकारितं॥४४॥सएववक्रतुंडस्तुसृजतेपातिनिप्रभुः॥हर
तिभावहीनश्चआद्यंतमध्यगःस्वयं॥४५॥एवंनानावतारेणस्वस्वधर्मरतान्सरा
न्॥असुरान्मानवादींश्चचकारवक्रतुंडकः॥४६॥अवतारानंतांश्चवक्रतुंडस्यमेवि
भोः॥तेषांचरित्रमखिलंकथितंशक्तानेनच॥४७॥इतिश्रीमन्मुद्गलेनाप्रविरच्यमु

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

शंकरेणच॥शेषेणमुनिभिश्चैववेदैः क्वाऽचतत्रवै॥४८॥ दिवोदासशमार्थंचसर्व
वक्रतुंडकः॥शिवपुत्रत्वमापन्नोढुंढिराजेतिमानतः॥४९॥वामनस्यवरंदातुंस
एवगणनायकः॥मकटोभून्महातेजाभक्तस्यभक्तपालकः॥५०॥एवंनानावतारैश्च
भक्तरक्षणलालसः॥करोतिभक्तसंरक्षांजानीहिंप्रजापते॥५१॥ब्रह्मणास्रष्टि
कार्यार्थंव्याकुलेनचसंस्मृतः॥वक्रतुंडश्चनंदैत्योमत्सरःप्रविवेशह॥५२॥ते
नासुरप्रभावेनधीहिनोविधिरद्भुतं॥विघ्नयुक्तश्चसंजातःसृष्टिकर्तुंचनक्ष
मः॥५३॥तेनापितत्स्मृतंसर्वंपुनस्तंशरण्ययो॥तेनविघ्नविहीनत्वंप्राप्तंचब्र
ह्मणाप्रभो॥५४॥इतिश्रीमद्दांत्येभो द्भवेप्रथमकांडेवक्रतुंडचरित्रेवक्रतुं
डांतर्थीनंनामैकोनचत्वारिंशोध्यायः॥श्रीगजाननार्पणमस्तु॥ ४७